कृत्वा उद्धरेयं वसुन्धराम् । जले निमग्नां धरणीं येनाहं वै समुद्धरे । इति सञ्चिन्त्य मनसा हरिर्नारायणः प्रभुः । जलक्रीडारुचिस्तस्माद्वाराहं वपुरस्मरत् । हरिरुद्धरणे युक्तस्तदाऽभूदस्य भूमिभृक् । अधृष्यं सर्वभूतानां वाङ्मयं ब्रह्मसंज्ञितम् । दशयोजनविस्तारमुच्छ्रितं शतयोजनम् । नीलजीमूतसङ्काशं मेघस्तनितनिस्वनम् । गिरिसंहननं भीमं श्वेततीक्ष्णोग्रदंष्ट्रिणम् । विद्युदग्निप्रकाशाक्षमादित्यसमतेजसम् । पीनवृत्तायतस्कन्धं दृप्तशार्दूलविक्रमम् । पीनोन्नतकटीदेशं वृषलक्षणलक्षितम् । रूपमास्थाय विपुलं वाराहममितं हरिः । पृथिव्युद्धरणार्थाय प्रविवेश रसातलम् । वेदपादो यूपदंष्ट्रः क्रतुहस्तश्चितीमुखः । अग्निजिह्वो दर्भरोमा ब्रह्मशीर्षो महातपाः । अहोरात्रेक्षणधरो वेदाङ्गश्रुतिभूषणः । आज्यनासः स्रुवतुण्डः सामघोषस्वनो महान् । सत्यधर्म्ममयः श्रीमान् क्रमविक्रमसत्कृतः । क्रियासत्रमहाघोणः पशुजानुर्म्महाकृतिः । उद्गातान्त्रो होमलिङ्गो वीजौषधिमहाफलः । वाय्वन्तरात्मा सत्रस्फिक्विकृतः सोमशोणितः । वेदिस्कन्धो हविर्गन्धो हव्यकव्यातिवेगवान् । प्राग्वंशकायो द्युतिमान्नानादीक्षाभिरन्वितः । दक्षिणाहृदयो योगी महासत्रमयो महान् । उपाकर्मौष्ठरुचकः प्रवर्ग्यावर्त्तभूषणः । नानाच्छन्दोगतिपथो गुह्योपनिषदासनः । छायापत्नीसहायो वै मणिशृङ्ग इवोच्छ्रितः । भूत्वा यज्ञवराहोऽसौ द्रागधः प्राविशद्गुरुः । अद्भिः सञ्छादितामुर्व्वीं स तामार्च्छत् प्रजापतिः । रसातलजले मग्नां रसातलतलं गतः । प्रभुर्लोकहितार्थाय दंष्ट्राग्रेणोज्जहार गाम् । ततः स्वस्थानमानीय पृथिवीं पृथिवीधरः । मुमोच पूर्व्वं सहसा धारयित्वा धराधरः । ततो जगाम निर्व्वाणं मेदिनी तस्य धारणात् । चकार च नमस्कारं तस्मै देवाय विष्णवे । एवं यज्ञवराहेण भूत्वा लोकहितार्थिना । उद्धृता पृथिवी देवी सागराम्बुधरा पुरा” हरिवं० २२४ अ० ।

**आदिविद्वस्** पु० आदिराद्योऽखिलसम्प्रदायप्रवर्त्तकत्वात् विद्वान् । सांख्यशास्त्रकारके सर्वसम्प्रदायप्रवर्त्तके उपासनयासिद्धे जगत्कर्त्तरि कपिले । “आदिविद्वान् सिद्ध”इति कापिलाः” कुसुमा० कपिलशब्दे विवृतिः ।

**आदिशक्ति** स्त्री आदिराद्या शक्तिः । परमेश्वरस्य १मायारूपशक्तौ २देवीमूर्त्तिभेदे च । आद्याशब्दे विवृतिः ।

**आदिशरीर** न० आदि आद्यं शरीरम् । भोगार्थं परमेशसृष्टे आद्ये लिङ्गाख्ये शरीरे । “अयमादिशरीरेण देवसृष्टेन मानवः । शुभानामशुभानाञ्च कुरुते सञ्चयं महत् । आयुषोऽन्ते प्रहायेदं क्षीणप्रायं कलेवरम् । संभवत्येव युगपद्यतो नास्त्यन्तरा भवः । तत्रास्य स्वकृतं कर्म्म छायेवानुगतम् तदा । फलत्यथ सुखार्हो वा दुःखार्हो वाऽथ जायते” भा० अ० प० १८४अ० । आदि कारणं शरीरं कर्म० । २अविद्याख्ये २सूक्ष्मशरीरे च वेदान्तिमते शरीरं त्रिविधं कारणसूक्ष्मस्थूलभेदात् तत्राविद्यायाः कारणशरीरत्वं सर्वकारणत्वात् विद्यया शीर्य्यमाणत्वाच्च अविद्यां प्रकृत्य “सा कारणशरीरं स्यात्” पञ्चद० । [त्यर्थे च ।

**आदिश्य** अव्य० आ+दिश–ल्यप् । १अनुशिष्येत्यर्थे २उक्त्वे-

**आदिष्ट** न० आ+दिश–भावे क्त । १आज्ञायाम्, २उपदेशे च । कर्म्मणि क्त । ३उपदिष्टे, ४व्याकरणप्रसिद्धे स्थानिजाते वर्णे च त्रि० यथा इकः स्थाने यण् आदिश्यते इति इकोयणादिष्टइत्युच्यते । ५आज्ञप्ते ६उच्छिष्टे ७अनुशिष्टे च त्रि० “उपपातकयुक्तानामनादिष्टेषु चैव हि” विश्वा० ।

**आदिष्टिन्** पु० आदिष्टमादेशोव्रतादेशः अस्त्यस्य इनि । व्रतादेशोयस्य कृतस्तादृशे, ब्रह्मचारिणि । “आदिष्टी नोदकं कुर्य्यादा व्रतस्य समापनात्” मनुः आदिष्टं व्रतादेशोऽस्त्यस्येति आदिष्टी ब्रह्मचारी” कुल्लू० । आदिष्टमनेन इष्टा० इनि । २आदेशकर्त्तरि त्रि० स्त्रियां ङीप् ।

**आदिसर्ग** पु० कर्म्म० । प्राकृतप्रलयोत्तरं प्रथमसृष्टौ ‘अव्यक्तात् पूर्व्वमुत्पन्नो महानात्मा महामतिः । आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते । महानात्मा मतिर्विष्णुर्जिष्णुः शम्भुश्च वीर्य्यवान् । बुद्धिः प्रज्ञोपलब्धिश्च तथा ख्यातिर्धृतिः स्मृतिः । पर्य्यायवाचकैः शब्दैर्म्महानात्मा विभाव्यते । तं जानन् ब्राह्मणो विद्वान् प्रमोहं नाधिगच्छति । सर्व्वतः पाणिपादश्च सर्वतोऽक्षिशिरोमुखः । सर्व्वतःश्रुतिमान् लोके सर्व्वं व्याप्य स तिष्ठति । महाप्रभावः पुरुषः सर्व्वस्यैव हि निश्चितः । अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः । तत्र बुद्धिविदो लोके सद्भावनिरताश्च ये । ध्यानिनो नित्ययोगाश्च सत्यसन्धा जितेन्द्रियाः । ज्ञानवन्तश्च ये केचिदलुब्धा जितमन्यवः । प्रसन्नमनसो धीरा निर्म्ममा निरहङ्कृताः । विमुक्ताः सर्व एवैते महत्त्वमुपयान्त्युत । आत्मनो महतो वेद यः पुण्यां गतिमुत्तमाम् । अहङ्कारात् प्रसूतानि महाभूतानि पञ्च वै । पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् । तेषु भूतानि युज्यन्ते महाभूतेषु पञ्चसु । ते शब्दस्पर्शरूपेषु रसगन्धक्रियासु च ।